श्रीः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीमान् वेङ्कटनाथार्यः कवितार्किककेसरी।
वेदान्ताचार्यवर्यो मे सन्निधत्तां सदा हृदि॥

श्री वेङ्कटाध्वरिकृतं

# ॥ श्री राघव-यादवीयम् ॥

*This document* has been prepared by*

***Sunder Kidambi***

*with the blessings of*

श्री रङ्गरामानुजमहादेशिकन्

**His Holiness *śrīmad āṇḍavan* of *śrīraṅgam***

*This was typeset using LaTeX and the **skt** font.

श्रीः

श्रीमते रामानुजाय नमः

# ॥ श्री राघव-यादवीयम् ॥

किञ्चित्सञ्चिन्तयोगोपीकिलकिञ्चितवञ्चितम्।
अञ्चितं ज्योतिरमरैरञ्जनाद्रावुदञ्चितम्॥

भद्रोल्लासंभास्करापत्यवाहि न्यन्तर्दीव्यन्नस्तवैर्युङ्ग्रबाणः।
नाथोऽहल्यानन्दहेतुः प्रदत्तां राजीवाक्षो राघवो यादवो वा॥

अनुवर्णितरामकृष्णवृत्तेरनुलोमप्रतिलोमवाचनाभ्याम्।
कृतिमुल्लसितां विधाय पद्यैः विवृणोति स्वयमेव वेङ्कटार्यः॥

वन्देऽहं देवं तं श्रीतं रन्तारं कालं भासा यः।
रामो रामाधीराप्यागो लीलामारायोध्ये वासे॥ १ ॥

सेवाध्येयो रामालाली गोप्याराधी मारामोराः।
यस्साभालङ्कारं तारं तं श्रीतं वन्देऽहं देवम्॥ १ ॥

साकेताख्या ज्यायामासीद्याविप्रादिप्तार्याधारा।
पूराजीतादेवाद्याविश्वासाग्र्यासावाशारावा॥ २ ॥

वाराशावासाग्र्या साश्वाविद्यावादेताजीरापूः।
राधार्याप्ता दीप्राविद्यासीमायाज्याख्याताकेसा॥ २ ॥

कामभारस्स्थलसारश्रीसौधासौघनवापिका।
सारसारवपीनासरागाकारसुभूरिभूः॥ ३ ॥

भूरिभूसुरकागारासनापीवरसारसा।
कापिवानघसौधासौ श्रीरसालस्थभामका॥ ३ ॥

रामधामसमानेनमागोरोधनमासताम्।
नामहामक्षररसं ताराभास्तु न वेद या॥ ४ ॥

www.prapatti.com

यादवेनस्तुभारातासंररक्षमहामनाः।
तां समानधरोगोमाननेमासमधामराः॥ ४ ॥

यन् गाधेयो योगी रागी वैताने सौम्ये सौख्येसौ।
तं ख्यातं शीतं स्फीतं भीमानामाश्रीहाता त्रातम्॥ ५ ॥

तं त्राताहाश्रीमानामाभीतं स्फीतं शीतं ख्यातं।
सौख्ये सौम्येसौ नेता वै गीरागीयो योधेगायन्॥ ५ ॥

मारमं सुकुमाराभं रसाजापनृताश्रितं।
काविरामदलापागोसमावामतरानते॥ ६ ॥

तेन रातमवामास गोपालादमराविका।
तं श्रितानृपजासारभं रामाकुसुमं रमा॥ ६ ॥

रामनामा सदा खेदभावे दया-
वानतापीनतेजारिपावानते।
कादिमोदासहातास्वभासारसा-
मेसुगोरेणुकागात्रजे भूरुमे॥ ७ ॥

मेरुभूजेत्रगाकाणुरेगोसुमे-
सारसा भास्वताहासदामोदिका।
तेन वा पारिजातेन पीता नवा
यादवे भादखेदासमानामरा॥ ७ ॥

सारसासमधाताक्षिभूम्नाधामसु सीतया।
साध्वसाविहरेमेक्षेम्यरमासुरसारहा॥ ८ ॥

हारसारसुमारम्यक्षेमेरेहविसाध्वसा।
यातसीसुमधाम्नाभूक्षिताधामससारसा॥ ८ ॥

सागसाभरतायेभमाभातामन्युमत्तया।
सात्रमध्यमयातापेपोतायाधिगतारसा॥ ९ ॥

सारतागधियातापोपेतायामध्यमत्रसा।
यात्तमन्युमताभामा भयेतारभसागसा॥ ९ ॥

तानवादपकोमाभारामेकाननदासस।
यालतावृद्धसेवाकाकैकेयीमहदाहह॥ १० ॥

हहदाहमयीकेकैकावासेद्धवृतालया।
सासदाननकामेराभामाकोपदवानता॥ १० ॥

वरमानदसत्यासह्रीतपित्रादरादहो।
भास्वरस्थिरधीरोपहारोरावनगाम्यसौ॥ ११ ॥

सौम्यगानवरारोहापरोधीरस्स्थिरस्वभाः।
होदरादत्रापितह्रीसत्यासदनमारवा॥ ११ ॥

यानयानघधीतादा रसायास्तनयादवे।
सागताहिवियाताह्रीसतापानकिलोनभा॥ १२ ॥

भानलोकिनपातासह्रीतायाविहितागसा।
वेदयानस्तयासारदाताधीघनयानया॥ १२ ॥

रागिराधुतिगर्वादारदाहोमहसाहह।
यानगातभरद्वाजमायासीदमगाहिनः॥ १३ ॥

नोहिगामदसीयामाजद्वारभतगानया।
हह साहमहोदारदार्वागतिधुरागिरा॥ १३ ॥

यातुराजिदभाभारं द्यां वमारुतगन्धगम्।
सोगमारपदं यक्षतुङ्गाभोनघयात्रया॥ १४ ॥

यात्रयाघनभोगातुं क्षयदं परमागसः।
गन्धगन्तरुमावद्यां रंभाभादजिरा तु या॥ १४ ॥

दण्डकां प्रदमोराजाल्याहतामयकारिहा।
ससमानवतानेनोभोग्याभोनतदासन॥ १५ ॥

नसदातनभोग्याभो नोनेतावनमास सः।
हारिकायमताहल्याजारामोदप्रकाण्डदम्॥ १५॥

सोरमारदनज्ञानोवेदेराकण्ठकुंभजम्।
तं द्रुसारपटोनागानानादोषविराधहा॥ १६॥

हाधराविषदोनानागानाटोपरसाद्रुतम्।
जम्भकुण्ठकरादेवेनोज्ञानदरमारसः॥ १६॥

सागमाकरपाताहाकङ्केनावनतोहिसः।
न समानर्दमारामालङ्काराजस्वसा रतम्॥ १७॥

तं रसास्वजराकालंमारामार्दनमासन।
सहितोनवनाकेकं हातापारकमागसा॥ १७॥

तां स गोरमदोश्रीदो विग्रामसदरोतत।
वैरमासपलाहारा विनासा रविवंशके॥ १८॥

केशवं विरसानाविराहालापसमारवैः।
ततरोदसमग्राविदोश्रीदोमरगोसताम्॥ १८॥

गोद्युगोमस्वमायोभूदश्रीगखरसेनया।
सहसाहवधारोविकलोराजदरातिहा॥ १९॥

हातिरादजरालोकविरोधावहसाहस।
यानसेरखगश्रीद भूयोमास्वमगोद्युगः॥ १९॥

हतपापचयेहेयो लङ्केशोयमसारधीः।
राजिराविरतेरापोहाहाहङ्ग्रहमारघः॥ २०॥

घोरमाहग्रहंहाहापोरातेरविराजिराः।
धीरसामयशोकेलं यो हेये च पपात ह॥ २०॥

ताटकेयलवादेनोहारीहारिगिरासस:।
हासहायजनासीतानाप्तेनादमनाभुवि॥ २१॥

विभुनामदनाप्तेनातासीनाजयहासहा।
ससरागिरिहारीहानोदेवालयकेटता॥ २१ ॥

भारमाकुदशाकेनाशराधीकुहकेनहा।
चारुधीवनपालोक्या वैदेहीमहिताहृता॥ २२ ॥

ताहृताहिमहीदेवैक्यालोपानवधीरुचा।
हानकेहकुधीराशनाकेशादकुमारभाः॥ २२ ॥

हारितोयदभोरामावियोगेनघवायुजः।
तंरुमामहितोपेतामोदोसारज्ञरामयः॥ २३ ॥

योमराज्ञरसादोमोतापेतोहिममारुतम्।
जोयुवाघनगेयोविमाराभोदयतोरिहा॥ २३ ॥

भानुभानुतभावामासदामोदपरोहतं।
तंहतामरसाभाक्षोतिराताकृतवासविम्॥ २४ ॥

विंसवातकृतारातिक्षोभासारमताहतं।
तंहरोपदमोदासमावाभातनुभानुभाः॥ २४ ॥

हंसजारुद्धबलजापरोदारसुभाजिनि।
राजिरावणरक्षोरविघातायरमारयम्॥ २५ ॥

यंरमारयताघाविरक्षोरणवराजिरा।
निजभासुरदारोपजालबद्धरुजासहम्॥ २५ ॥

सागरातिगमाभातिनाकेशोसुरमासहः।
तंसमारुतजङ्गोप्ताभादासाद्यगतोगजम्॥ २६ ॥

जंगतोगद्यसादाभाप्तागोजंतरुमासतं।
हस्समारसुशोकेनातिभामागतिरागसा॥ २६ ॥

वीरवानरसेनस्य त्राताभादवता हि सः।
तोयधावरिगोयादस्ययतोनवसेतुना॥ २७ ॥

www.prapatti.com

नातुसेवनतोयस्यदयागोरिवधायतः।
सहितावदभातात्रास्यनसेरनवारवी॥ २७ ॥

हारिसाहसलङ्केनासुभेदीमहितोहिसः।
चारुभूतनुजोरामोरमाराधयदार्तिहा॥ २८ ॥

हार्तिदायधरामारमोराजोनुतभूरुचा।
सहितोहिमदीभेसुनाकेलंसहसारिहा॥ २८ ॥

नालिकेरसुभाकारागारासौसुरसापिका।
रावणारिक्षमेरापूराभेजे हि ननामुना॥ २९ ॥

नामुनानहिजेभेरापूरामेक्षरिणावरा।
कापिसारसुसौरागाराकाभासुरकेलिना॥ २९ ॥

साग्र्यतामरसागारामक्षामाघनभारगौः।
निजदेपरजित्यास श्रीरामे सुगराजभा॥ ३० ॥

भाजरागसुमेराश्रीसत्याजिरपदेजनि।
गौरभानघमाक्षामरागासारमताग्र्यसा॥ ३० ॥

॥ इति श्रीराघव-यादवीयं सम्पूर्णम्॥

महीसुता सुहृत्त्वेन ख्यातौ सत्यानुसारिणौ।
दीव्येतां हृदये नित्यं देवौ राघवायादवौ॥

॥ इति श्रीमद्वाजपेयसर्वंप्रतिष्ठाप्तोर्यामादियाजि श्रीनिवासाचार्यनन्दन रघुनाथार्यदीक्षित तनयस्य श्रीमत्काञ्चीपुरवसतेः आत्रेयवेङ्कटाचार्य यज्वनः कृतिषु राघवयादवीयचरिताख्ये दुष्करकाव्ये प्रथमभागः॥

www.prapatti.com